# Guru Raghavendra Stotra:

# English:

*shrIpUrNabOdha guruteertha payObdhipaara
kaamaarimaakShaviShamaakShashiraHspRushaMtee |
poorvOttaraamitataraMgacharatsuhaMsA
dEvaalisEvita paraaMghripayOjalagnaa || 1 ||*

*jeevEshabhEdaguNapoorti jagatsu satva
neechOchchabhaava mukhanakragaNaiH samEtA |
durvaadyajaapatigilairgururaaghavEMdra
vAgdEvataasaridamuM vimaleekarotu || 2 ||*

*shri rAghavEMdraH sakalapradaataa svapaadakaMjadvayabhakti madbhyaH |
aghaadrisaMbhEdanadRuShTivajraH kShamaasurEMdrO&vatu mAM
sadA&yaM || 3 ||*

*shri rAghavEMdrO haripaadakaMjaniShEvaNAllabdha samastasaMpat |
dEvasvabhaavO divijadrumO&yamiShTapradO mE satataM sa bhooyaat || 4 ||*

*bhavyasvaroopO bhavaduHkhatoolasaMghagnicharyaH sukhadhairyashAlee |
samastaduShTagrahanigrahEsho | duratyayOpaplavasiMdhusEtuH || 5 ||*

*nirastadOShO niravadyavEShaH pratyarthimookatvanidaanabhaaShaH |
vidvatparij~jEyamahaavishEsho vaagvaikharInirjitabhavyashEShaH || 6 ||*

*saMtAnasaMpatparishuddhabhakti vij~jaanavaagdEhasupATavaadeen datvaa |
sharIrOttha samastadOShaan hatvaa | sa nO&vyaadgururaaghavEMdraH || 7 ||*

*yatpaadOdakasaMchayaH suranadee mukhyaapagaasaaditA
saMkhyaanuttamapuNyasaMghavilasatprakhyaatapuNyaavahaH |
dustaapatrayanaashano bhuvi mahaa vandhyaasuputraprado |
vyangasvangasamruddhido grahamahaapaapaapahastam shraye || 8 ||*

*yatpAdakaMjarajasaa paribhooShitAMgAH
yatpaadapadma madhupaayitamaanasaa yE |
yatpaadapadmaparikeertana jeerNa vaacha
staddarshanaM duritakaananadaavabhootaM || 9 ||*

*sarvataMtra swataMtrO&sau shrImadhvamatavardhanaH |
vijayeeMdrakaraabjOttha sudheeMdravaraputrakaH || 10 ||*

*shrI rAghavEMdrO yatirAT gururme syaadbhayaapahaH |
j~jAna bhakti suputraayuryashaha shri punyavardhanaha || 11 ||*

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

*prativaadijayasvaaMtabhEdachihnaadarO guruH |
sarvavidyaapraveeNO&nyO raaghavEMdraanna vidyate || 12 ||*

*aparOkSheekRutashreeshaH samupEkShitabhaavajaH |
apEkShitapradaataanyO raaghavEMdraanna vidyate || 13 ||*

*dayaadaakShiNyavairAgya vaakpaaTavamukhaaMkitaH |
shaapaanugrahashaktO&nyO raaghavEMdraanna vidyate || 14 ||*

*aj~jaanavismriti bhraaMti saMshayaapasmRutikShayaaH |
taMdraakaMpavachaHkauMThyamukhaa yE chEMdriyOdbhavaaH || 15 ||*

*dOShaaste naashamaayaaMti raaghavEMdraprasaadataH |
"OM shrI raaghavEMdraaya namaH" ityaShTaakSharamaMtrataH |
japitaadbhaavitaanityam iShTaarthaassyurna saMshayaH || 16 ||*

*haMtu naH kaayajaan dOShaan aatmaatmeeyasamudbhavaan |
sarvaanapi pumarthAMScha dadaatu gurufaatmavit || 17 ||*

*iti kaalatrayE nityaM praarthanaaM yaH karOti saH |
ihaamutraaptasarvEShTO mOdatE naatra saMshayaH || 18 ||*

*agamyamahimaa lOkE rAghavEMdrO mahaayashaaH |
shrimadhvamatadugdhaabdhi chaMdrO&vatu sadaanaghaH || 19 ||*

*sarvayaatraaphalaavaaptyai yathaashaktipradakShiNaM |
karOmi tava siddhasya bRuMdaavanagataM jalaM || 20 ||*

*shirasaa dhaarayaamyadya sarvateerthaphalaaptaye |
sarvaabheeShTaarthasiddhyarthaM namaskaaraM karOmyahaM || 21 ||*

*tava saMkeertanaM vEdashaastrArthaj~jaanasiddhayE |
saMsaare akShayasaagare prakRutitO&gAdhE sadaa dustarE |
sarvaavadyajalagrahairanupamaiH kAmaadibhaMgaakulE |
nAnA vibhramadurbhramE&mitabhayastOmaadiphEnOtkaTE |
duHkhOtkRuShTaviShE samuddhara gurO mAM magnaroopaM sadaa || 22 ||*

*rAghavEMdragurustOtraM yaHpaThEdbhaktipoorvakaM |
tasya kuShThaadirOgaanaam nivruttistarayaa bhavet || 23 ||*

*andho.api divyadrishtihi syaadedamookopivaakpatithi |
purnaayuhu purnasampattihi stotrasyaasya japaadbhavet || 24 ||*

*yaH pibEjjalamEtEna stOtrENaivaabhimaMtritaM |
tasya kukShigataa dOShaaH sarvE nashyaMti tat kShaNaat || 25 ||*

WWW.GURURAGHAVENDRA.ORG Satsangha Stotra Collection

*yadvRuMdaavanamaasaadya paMguH khaMjO&pi vaa janaH |*
*stOtrENaanEna yaH kuryaat pradakShiNanamaskRutI || 26 ||*

*sa jaMGaalO bhavEdEva gururaajaprasaadataH |*
*sOmasooryOparaagE cha puShyaarkaadisamaagamE || 27 ||*

*yO&nuttamamidaM stOtramaShTOttarashataM japEt |*
*bhootaprEtapishaachaadi peeDaa tasya na jaayatE || 28 ||*

*Etat stOtraM samuchchaarya gurOrvRuMdaavanaaMtikE |*
*deepasaMyOjanaaj~jaanaM putralaabhO bhavEddhruvaM || 29 ||*

*paravaadijayO divyaj~jaanabhaktyaadivardhanaM |*
*sarvaabheeShTapravRuddhiH syaat naatra kAryaa vichaaraNaa || 30 ||*

*raajachOramahaavyaaghra sarpanakraadipeeDanaM |*
*na jaayatE&sya stOtrasya prabhaavaannaatra saMshayaH || 31 ||*

*yO bhaktyaa gururAghavEMdra charaNadvaMdvaM smaran yaH paThEt |*
*stOtraM divyamidaM sadaa na hi bhavEtta syaasukhaM kiMchana ||*

*kiMtviShTaarthasamRuddhirEva kamalaanaathaprasaadOdayaat |*
*keertirdigviditaa vibhootiratulA “saakShee hayaasyO&tra hi” || 32 ||*

*iti shrIraaghavEMdraaryaguraajaprasaadataH |*
*kRutaM stOtramidaM puNyaM shrImadbhiryappaNaabhidaiH ||*

*poojyaaya rAghavEMdraaya satyadharmarataaya cha |*
*bhajataaM kalpavRukShaaya namataaM kaamadhEnavE ||*

*durvAdi dhwAMtaravayE vaiShNavEMdIvarEMdavE*
*shrIraaghavEMdraguravE namOtyaMtadayALavE*

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

## Guru Raghavendra Stotra:

## Sanskrit:

श्रीपूर्णबोध गुरुतीर्थ पयोब्धिपार
कामारिमाक्षविषमाक्षशिरःस्पृशंती ।
पूर्वोत्तरामिततरंगचरत्सुहंसा
देवालिसेवित परांघ्रिपयोजलग्ना ॥ १ ॥

जीवेशभेदगुणपूर्ति जगत्सु सत्व
नीचोच्चभाव मुखनक्रगणैः समेता ।
दुर्वाद्यजापतिगिलैर्गुरुराघवेंद्र
वाग्देवतासरिदमुं विमलीकरोतु ॥ २ ॥

श्रि राघवेंद्रः सकलप्रदाता स्वपादकंजद्वयभक्ति मद्भ्यः ।
अघाद्रिसंभेदनदृष्टिवज्रः क्षमासुरेंद्रोऽवतु मां सदाऽयं ॥ ३ ॥

श्रि राघवेंद्रो हरिपादकंजनिषेवणाल्लब्ध समस्तसंपत् ।
देवस्वभावो दिविजद्रुमोऽयमिष्टप्रदो मे सततं स भूयात् ॥ ४ ॥

भव्यस्वरूपो भवदुःखतूलसंघग्निचर्यः सुखधैर्यशाली ।
समस्तदुष्टग्रहनिग्रहेशो । दुरत्ययोपप्लवसिंधुसेतुः ॥ ५ ॥

निरस्तदोषो निरवद्यवेषः प्रत्यर्थिमूकत्वनिदानभाषः ।
विद्वत्परिज्ञेयमहाविशेषो वाग्वैखरीनिर्जितभव्यशेषः ॥ ६ ॥

संतानसंपत्परिशुद्धभक्ति विज्ञानवाग्देहसुपाटवादीन् दत्वा ।
शरीरोत्थ समस्तदोषान् हत्वा । स नोऽव्याद्गुरुराघवेंद्रः ॥ ७ ॥

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

यत्पादोदकसंचयः सुरनदी मुख्यापगासादिता
संख्यानुत्तमपुण्यसंघविलसत्प्रख्यातपुण्यावहः ।
दुस्तापत्रयनाशनो भुवि महा वन्ध्यासुपुत्रप्रदो ।
व्यन्गस्वन्गसम्रुद्धिदो ग्रहमहापापापहस्तम् श्रये ॥ ८ ॥

यत्पादकंजरजसा परिभूषितांगाः
यत्पादपद्म मधुपायितमानसा ये ।
यत्पादपद्मपरिकीर्तन जीर्ण वाच
स्तद्दर्शनं दुरितकाननदावभूतं ॥ ९ ॥

सर्वतंत्र स्वतंत्रोऽसौ श्रीमध्वमतवर्धनः ।
विजयींद्रकराब्जोत्थ सुधींद्रवरपुत्रकः ॥ १० ॥

श्री राघवेंद्रो यतिराट् गुरुर्मे स्याद्भयापहः ।
ज्ञान भक्ति सुपुत्रायुर्यशह श्रि पुन्यवर्धनह ॥ ११ ॥

प्रतिवादिजयस्वांतभेदचिह्नादरो गुरुः ।
सर्वविद्याप्रवीणोऽन्यो राघवेंद्रान्न विद्यते ॥ १२ ॥

अपरोक्षीकृतश्रीशः समुपेक्षितभावजः ।
अपेक्षितप्रदातान्यो राघवेंद्रान्न विद्यते ॥ १३ ॥

दयादाक्षिण्यवैराग्य वाक्पाटवमुखांकितः ।
शापानुग्रहशक्तोऽन्यो राघवेंद्रान्न विद्यते ॥ १४ ॥

अज्ञानविस्म्रिति भ्रांति संशयापस्मृतिक्षयाः ।
तंद्राकंपवचःकौंठ्यमुखा ये चेंद्रियोद्भवाः ॥ १५ ॥

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

दोषास्ते नाशमायांति राघवेंद्रप्रसादतः ।
ओं श्री राघवेंद्राय नमः इत्यष्टाक्षरमंत्रतः ।
जपिताद्भावितानित्यम् इष्टार्थास्स्युर्न संशयः ॥ १६ ॥

हंतु नः कायजान् दोषान् आत्मात्मीयसमुद्भवान् ।
सर्वानपि पुमर्थांश्च ददातु गुरुरात्मवित् ॥ १७ ॥

इति कालत्रये नित्यं प्रार्थनां यः करोति सः ।
इहामुत्राप्तसर्वेष्टो मोदते नात्र संशयः ॥ १८ ॥

अगम्यमहिमा लोके राघवेंद्रो महायशाः ।
श्रिमध्वमतदुग्धाब्धि चंद्रोऽवतु सदानघः ॥ १९ ॥

सर्वयात्राफलावाप्त्यै यथाशक्तिप्रदक्षिणं ।
करोमि तव सिद्धस्य बृंदावनगतं जलं ॥ २० ॥

शिरसा धारयाम्यद्य सर्वतीर्थफलाप्तये ।
सर्वाभीष्टार्थसिद्ध्यर्थं नमस्कारं करोम्यहं ॥ २१ ॥

तव संकीर्तनं वेदशास्त्रार्थज्ञानसिद्धये ।
संसारे अक्षयसागरे प्रकृतितोऽगाधे सदा दुस्तरे ।
सर्वावद्यजलग्रहैरनुपमैः कामादिभंगाकुले ।
नाना विभ्रमदुभ्रमेऽमितभयस्तोमादिफेनोत्कटे ।
दुःखोत्कृष्टविषे समुद्धर गुरो मां मग्नरूपं सदा ॥ २२ ॥

राघवेंद्रगुरुस्तोत्रं यःपठेद्भक्तिपूर्वकं ।
तस्य कुष्ठादिरोगानाम् निवृुत्तिस्तरया भवेत् ॥ २३ ॥

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

अन्धो.अपि दिव्यद्रिश्तिहि स्यादेदमूकोपिवाक्पतिथि ।
पुर्नायुहु पुर्नसम्पत्तिहि स्तोत्रस्यास्य जपाद्भवेत् ॥ २४ ॥

यः पिबेज्जलमॆतेन स्तॊत्रॆणैवाभिमंत्रितं ।
तस्य कुक्षिगता दोषाः सर्वे नश्यंति तत् क्षणात् ॥ २५ ॥

यद्वृंदावनमासाद्य पंगुः खंजोऽपि वा जनः ।
स्तॊत्रॆणानेन यः कुर्यात् प्रदक्षिणनमस्कृती ॥ २६ ॥

स जंघालॊ भवॆदेव गुरुराजप्रसादतः ।
सॊमसूर्योपरागे च पुष्यार्कादिसमागमॆ ॥ २७ ॥

यॊऽनुत्तममिदं स्तॊत्रमष्टोत्तरशतं जपॆत् ।
भूतप्रेतपिशाचादि पीडा तस्य न जायतॆ ॥ २८ ॥

ऐतत् स्तॊत्रं समुच्चार्य गुरोर्वृंदावनांतिके ।
दीपसंयॊजनाज्ञानं पुत्रलाभॊ भवॆद्ध्रुवं ॥ २९ ॥

परवादिजयॊ दिव्यज्ञानभक्त्यादिवर्धनं ।
सर्वाभीष्टप्रवृद्धिः स्यात् नात्र कार्या विचारणा ॥ ३० ॥

राजचॊरमहाव्याघ्र सर्पनक्रादिपीडनं ।
न जायतेऽस्य स्तॊत्रस्य प्रभावान्नात्र संशयः ॥ ३१ ॥

यॊ भक्त्या गुरुराघवॆंद्र चरणद्वंद्वं स्मरन् यः पठेत् ।
स्तॊत्रं दिव्यमिदं सदा न हि भवॆत्त स्यासुखं किंचन ॥

किंत्विष्टार्थसमृद्धिरॆव कमलानाथप्रसादॊदयात् ।

WWW.GURURAGHAVENDRA.ORG Satsangha Stotra Collection

कीर्तिर्दिग्विदिता विभूतिरतुला साक्षी हयास्योऽत्र हि ॥ ३२ ॥

इति श्रीराघवेंद्रार्यगुराजप्रसादतः ।
कृतं स्तोत्रमिदं पुण्यं श्रीमद्भिर्यप्पणाभिदैः ॥

पूज्याय राघवेंद्राय सत्यधर्मरताय च ।
भजतां कल्पवृक्षाय नमतां कामधेनवे ॥

दुर्वादि ध्वांतरवये वैष्णवेंदीवरेंदवे
श्रीराघवेंद्रगुरवे नमोत्यंतदयाळवे

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

## Guru Raghavendra Stotra:

## KANNADA:

ಶ್ರೀಪೂರ್ಣಬೋಧ ಗುರುತೀರ್ಥ ಪಯೋಬ್ಧಿಪಾರ
ಕಾಮಾರಿಮಾಕ್ಷವಿಷಮಾಕ್ಷಶಿರಃಸ್ಪೃಶಂತೀ ।
ಪೂರ್ವೋತ್ತರಾಮಿತತರಂಗಚರತ್ಸುಹಂಸಾ
ದೇವಾಲಿಸೇವಿತ ಪರಾಂಘ್ರಿಪಯೋಜಲಗ್ನಾ ॥ ೧ ॥

ಜೀವೇಶಭೇದಗುಣಪೂರ್ತಿ ಜಗತ್ಸು ಸತ್ವ
ನೀಚೋಚ್ಚಭಾವ ಮುಖನಕ್ರಗಣೈಃ ಸಮೇತಾ ।
ದುರ್ವಾದ್ಯಜಾಪತಿಗಿಲೈರ್ಗುರುರಾಘವೇಂದ್ರ
ವಾಗ್ದೇವತಾಸರಿದಮುಂ ವಿಮಲೀಕರೊತು ॥ ೨ ॥

ಶ್ರಿ ರಾಘವೇಂದ್ರಃ ಸಕಲಪ್ರದಾತಾ ಸ್ವಪಾದಕಂಜದ್ವಯಭಕ್ತಿ ಮದ್ಭ್ಯಃ ।
ಅಘಾದ್ರಿಸಂಭೇದನದೃಷ್ಟಿವಜ್ರಃ ಕ್ಷಮಾಸುರೇಂದ್ರೋಽವತು ಮಾಂ ಸದಾಽಯಂ ॥ ೩ ॥

ಶ್ರಿ ರಾಘವೇಂದ್ರೋ ಹರಿಪಾದಕಂಜನಿಷೇವಣಾಲ್ಲಬ್ಧ ಸಮಸ್ತಸಂಪತ್ ।
ದೇವಸ್ವಭಾವೋ ದಿವಿಜದ್ರುಮೋಽಯಮಿಷ್ಟಪ್ರದೋ ಮೇ ಸತತಂ ಸ ಭೂಯಾತ್ ॥ ೪ ॥

ಭವ್ಯಸ್ವರೂಪೋ ಭವದುಃಖತೂಲಸಂಘಾಗ್ನಿಚರ್ಯಾಃ ಸುಖಧೈರ್ಯಶಾಲೀ ।
ಸಮಸ್ತದುಷ್ಟಗ್ರಹನಿಗ್ರಹೇಶೊ । ದುರತ್ಯಯೋಪಪ್ಲವಸಿಂಧುಸೇತುಃ ॥ ೫ ॥

ನಿರಸ್ತದೋಷೋ ನಿರವದ್ಯವೇಷಃ ಪ್ರತ್ಯರ್ಥಿಮೂಕತ್ವನಿದಾನಭಾಷಃ ।
ವಿದ್ವತ್ಪರಿಜ್ಞೇಯಮಹಾವಿಶೇಷೊ ವಾಗ್ವೈಖರೀನಿರ್ಜಿತಭವ್ಯಶೇಷಃ ॥ ೬ ॥

ಸಂತಾನಸಂಪತ್ಪರಿಶುದ್ಧಭಕ್ತಿ ವಿಜ್ಞಾನವಾಗ್ದೇಹಸುಪಾಟವಾದೀನ್ ದತ್ವಾ ।
ಶರೀರೋತ್ಥ ಸಮಸ್ತದೋಷಾನ್ ಹತ್ವಾ । ಸ ನೋಽವ್ಯಾದ್ಗುರುರಾಘವೇಂದ್ರಃ ॥ ೭ ॥

ಯತ್ಪಾದೋದಕಸಂಚಯಃ ಸುರನದೀ ಮುಖ್ಯಾಪಗಾಸಾದಿತಾ
ಸಂಖ್ಯಾನುತ್ತಮಪುಣ್ಯಸಂಘವಿಲಸತ್ಪ್ರಖ್ಯಾತಪುಣ್ಯಾವಹಃ ।
ದುಸ್ತಾಪತ್ರಯನಾಶನೊ ಭುವಿ ಮಹಾ ವನ್ಧ್ಯಾಸುಪುತ್ರಪ್ರದೊ ।

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

ವ್ಯನ್ಗಸ್ವನ್ಗಸಮ್ರುದ್ಧಿದೊ ಗ್ರಹಮಹಾಪಾಪಾಪಹಸ್ತಮ್ ಶ್ರಯೆ ॥ ೮ ॥

ಯತ್ಪಾದಕಂಜರಜಸಾ ಪರಿಭೂಷಿತಾಂಗಾಃ
ಯತ್ಪಾದಪದ್ಮ ಮಧುಪಾಯಿತಮಾನಸಾ ಯೇ ।
ಯತ್ಪಾದಪದ್ಮಪರಿಕೀರ್ತನ ಜೀರ್ಣ ವಾಚ
ಸ್ತದ್ದರ್ಶನಂ ದುರಿತಕಾನನದಾವಭೂತಂ ॥ ೯ ॥

ಸರ್ವತಂತ್ರ ಸ್ವತಂತ್ರೋಽಸೌ ಶ್ರೀಮಧ್ವಮತವರ್ಧನಃ ।
ವಿಜಯೀಂದ್ರಕರಾಬ್ಜೋತ್ಥ ಸುಧೀಂದ್ರವರಪುತ್ರಕಃ ॥ ೧೦ ॥

ಶ್ರೀ ರಾಘವೇಂದ್ರೋ ಯತಿರಾಟ್ ಗುರುರ್ಮೆ ಸ್ಯಾದ್ಭಯಾಪಹಃ ।
ಜ್ಞಾನ ಭಕ್ತಿ ಸುಪುತ್ರಾಯುರ್ಯಶಹ ಶ್ರಿ ಪುನ್ಯವರ್ಧನಹ ॥ ೧೧ ॥

ಪ್ರತಿವಾದಿಜಯಸ್ವಾಂತಭೇದಚಿಹ್ನಾದರೋ ಗುರುಃ ।
ಸರ್ವವಿದ್ಯಾಪ್ರವೀಣೋಽನ್ಯೋ ರಾಘವೇಂದ್ರಾನ್ನ ವಿದ್ಯತೆ ॥ ೧೨ ॥

ಅಪರೋಕ್ಷೀಕೃತಶ್ರೀಶಃ ಸಮುಪೇಕ್ಷಿತಭಾವಜಃ ।
ಅಪೇಕ್ಷಿತಪ್ರದಾತಾನ್ಯೋ ರಾಘವೇಂದ್ರಾನ್ನ ವಿದ್ಯತೆ ॥ ೧೩ ॥

ದಯಾದಾಕ್ಷಿಣ್ಯವೈರಾಗ್ಯ ವಾಕ್ಪಾಟವಮುಖಾಂಕಿತಃ ।
ಶಾಪಾನುಗ್ರಹಶಕ್ತೋಽನ್ಯೋ ರಾಘವೇಂದ್ರಾನ್ನ ವಿದ್ಯತೆ ॥ ೧೪ ॥

ಅಜ್ಞಾನವಿಸ್ಮ್ರುತಿ ಭ್ರಾಂತಿ ಸಂಶಯಾಪಸ್ಮೃತಿಕ್ಷಯಾಃ ।
ತಂದ್ರಾಕಂಪವಚಃಕೌಂಠ್ಯಮುಖಾ ಯೇ ಚೇಂದ್ರಿಯೋದ್ಭವಾಃ ॥ ೧೫ ॥

ದೋಷಾಸ್ತೆ ನಾಶಮಾಯಾಂತಿ ರಾಘವೇಂದ್ರಪ್ರಸಾದತಃ ।
ಓಂ ಶ್ರೀ ರಾಘವೇಂದ್ರಾಯ ನಮಃ ಇತ್ಯಷ್ಟಾಕ್ಷರಮಂತ್ರತಃ ।
ಜಪಿತಾದ್ಭಾವಿತಾನಿತ್ಯಮ್ ಇಷ್ಟಾರ್ಥಾಸ್ಸ್ಯುರ್ನ ಸಂಶಯಃ ॥ ೧೬ ॥

ಹಂತು ನಃ ಕಾಯಜಾನ್ ದೋಷಾನ್ ಆತ್ಮಾತ್ಮೀಯಸಮುದ್ಭವಾನ್ ।
ಸರ್ವಾನಪಿ ಪುಮರ್ಥಾಂಶ್ಚ ದದಾತು ಗುರುರಾತ್ಮವಿತ್ ॥ ೧೭ ॥

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

ಇತಿ ಕಾಲತ್ರಯೇ ನಿತ್ಯಂ ಪ್ರಾರ್ಥನಾಂ ಯಃ ಕರೋತಿ ಸಃ ।
ಇಹಾಮುತ್ರಾಪ್ತಸರ್ವೇಷ್ಟೋ ಮೋದತೇ ನಾತ್ರ ಸಂಶಯಃ ॥ ೧೮ ॥

ಅಗಮ್ಯಮಹಿಮಾ ಲೋಕೇ ರಾಘವೇಂದ್ರೋ ಮಹಾಯಶಾಃ ।
ಶ್ರಿಮಧ್ವಮತದುಗ್ಧಾಬ್ಧಿ ಚಂದ್ರೋಽವತು ಸದಾನಘಃ ॥ ೧೯ ॥

ಸರ್ವಯಾತ್ರಾಫಲಾವಾಪ್ತ್ಯೈ ಯಥಾಶಕ್ತಿಪ್ರದಕ್ಷಿಣಂ ।
ಕರೋಮಿ ತವ ಸಿದ್ಧಸ್ಯ ಬೃಂದಾವನಗತಂ ಜಲಂ ॥ ೨೦ ॥

ಶಿರಸಾ ಧಾರಯಾಮ್ಯದ್ಯ ಸರ್ವತೀರ್ಥಫಲಾಪ್ತಯೆ ।
ಸರ್ವಾಭೀಷ್ಟಾರ್ಥಸಿದ್ಧ್ಯರ್ಥಂ ನಮಸ್ಕಾರಂ ಕರೋಮ್ಯಹಂ ॥ ೨೧ ॥

ತವ ಸಂಕೀರ್ತನಂ ವೇದಶಾಸ್ತ್ರಾರ್ಥಜ್ಞಾನಸಿದ್ಧಯೇ ।
ಸಂಸಾರೆ ಅಕ್ಷಯಸಾಗರೆ ಪ್ರಕೃತಿತೋಽಗಾಧೇ ಸದಾ ದುಸ್ತರೇ ।
ಸರ್ವಾವದ್ಯಜಲಗ್ರಹೈರನುಪಮೈಃ ಕಾಮಾದಿಭಂಗಾಕುಲೇ ।
ನಾನಾ ವಿಭ್ರಮದುರ್ಭ್ರಮೇಽಮಿತಭಯಸ್ತೋಮಾದಿಫೇನೋತ್ಕಟೇ ।
ದುಃಖೋತ್ಕೃಷ್ಟವಿಷೇ ಸಮುದ್ಧರ ಗುರೋ ಮಾಂ ಮಗ್ನರೂಪಂ ಸದಾ ॥ ೨೨ ॥

ರಾಘವೇಂದ್ರಗುರುಸ್ತೋತ್ರಂ ಯಃಪಠೇದ್ಭಕ್ತಿಪೂರ್ವಕಂ ।
ತಸ್ಯ ಕುಷ್ಠಾದಿರೋಗಾನಾಮ್ ನಿವೃತ್ತಿಸ್ತರಯಾ ಭವೇತ್ ॥ ೨೩ ॥

ಅನ್ಧೊ.ಅಪಿ ದಿವ್ಯದ್ರಿಶ್ತಿಹಿ ಸ್ಯಾದೆದಮೂಕೊಪಿವಾಕ್ಪತಿಥಿ ।
ಪುರ್ನಾಯುಹು ಪುರ್ನಸಮ್ಪತ್ತಿಹಿ ಸ್ತೊತ್ರಸ್ಯಾಸ್ಯ ಜಪಾದ್ಭವೇತ್ ॥ ೨೪ ॥

ಯಃ ಪಿಬೇಜ್ಜಲಮೇತೇನ ಸ್ತೋತ್ರೇಣೈವಾಭಿಮಂತ್ರಿತಂ ।
ತಸ್ಯ ಕುಕ್ಷಿಗತಾ ದೋಷಾಃ ಸರ್ವೇ ನಶ್ಯಂತಿ ತತ್ ಕ್ಷಣಾತ್ ॥ ೨೫ ॥

ಯದ್ವೃಂದಾವನಮಾಸಾದ್ಯ ಪಂಗುಃ ಖಂಜೋಽಪಿ ವಾ ಜನಃ ।
ಸ್ತೋತ್ರೇಣಾನೇನ ಯಃ ಕುರ್ಯಾತ್ ಪ್ರದಕ್ಷಿಣನಮಸ್ಕೃತೀ ॥ ೨೬ ॥

ಸ ಜಂಘಾಲೋ ಭವೇದೇವ ಗುರುರಾಜಪ್ರಸಾದತಃ ।
ಸೋಮಸೂರ್ಯೋಪರಾಗೇ ಚ ಪುಷ್ಯಾರ್ಕಾದಿಸಮಾಗಮೇ ॥ ೨೭ ॥

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

ಯೋಽನುತ್ತಮಮಿದಂ ಸ್ತೋತ್ರಮಷ್ಟೋತ್ತರಶತಂ ಜಪೇತ್ ।
ಭೂತಪ್ರೇತಪಿಶಾಚಾದಿ ಪೀಡಾ ತಸ್ಯ ನ ಜಾಯತೇ ॥ ೨೮ ॥

ಏತತ್ ಸ್ತೋತ್ರಂ ಸಮುಚ್ಚಾರ್ಯ ಗುರೋರ್ವೃಂದಾವನಾಂತಿಕೇ ।
ದೀಪಸಂಯೋಜನಾಜ್ಞಾನಂ ಪುತ್ರಲಾಭೋ ಭವೇದ್ಧ್ರುವಂ ॥ ೨೯ ॥

ಪರವಾದಿಜಯೋ ದಿವ್ಯಜ್ಞಾನಭಕ್ತ್ಯಾದಿವರ್ಧನಂ ।
ಸರ್ವಾಭೀಷ್ಟಪ್ರವೃದ್ಧಿಃ ಸ್ಯಾತ್ ನಾತ್ರ ಕಾರ್ಯಾ ವಿಚಾರಣಾ ॥ ೩೦ ॥

ರಾಜಚೋರಮಹಾವ್ಯಾಘ್ರ ಸರ್ಪನಕ್ರಾದಿಪೀಡನಂ ।
ನ ಜಾಯತೇಽಸ್ಯ ಸ್ತೋತ್ರಸ್ಯ ಪ್ರಭಾವಾನ್ನಾತ್ರ ಸಂಶಯಃ ॥ ೩೧ ॥

ಯೋ ಭಕ್ತ್ಯಾ ಗುರುರಾಘವೇಂದ್ರ ಚರಣದ್ವಂದ್ವಂ ಸ್ಮರನ್ ಯಃ ಪಠೇತ್ ।
ಸ್ತೋತ್ರಂ ದಿವ್ಯಮಿದಂ ಸದಾ ನ ಹಿ ಭವೇತ್ತ ಸ್ಯಾಸುಖಂ ಕಿಂಚನ ॥

ಕಿಂತ್ವಿಷ್ಟಾರ್ಥಸಮೃದ್ಧಿರೇವ ಕಮಲಾನಾಥಪ್ರಸಾದೋದಯಾತ್ ।
ಕೀರ್ತಿರ್ದಿಗ್ವಿದಿತಾ ವಿಭೂತಿರತುಲಾ ಸಾಕ್ಷೀ ಹಯಾಸ್ಯೋಽತ್ರ ಹಿ ॥ ೩೨ ॥

ಇತಿ ಶ್ರೀರಾಘವೇಂದ್ರಾರ್ಯಗುರುರಾಜಪ್ರಸಾದತಃ ।
ಕೃತಂ ಸ್ತೋತ್ರಮಿದಂ ಪುಣ್ಯಂ ಶ್ರೀಮದ್ಭಿರ್ಯಪ್ಪಣಾಭಿದ್ಯೈಃ ॥

ಪೂಜ್ಯಾಯ ರಾಘವೇಂದ್ರಾಯ ಸತ್ಯಧರ್ಮರತಾಯ ಚ ।
ಭಜತಾಂ ಕಲ್ಪವೃಕ್ಷಾಯ ನಮತಾಂ ಕಾಮಧೇನವೇ ॥

ದುರ್ವಾದಿ ಧ್ವಾಂತರವಯೇ ವೈಷ್ಣವೇಂದೀವರೇಂದವೇ
ಶ್ರೀರಾಘವೇಂದ್ರಗುರವೇ ನಮೋತ್ಯಂತದಯಾಳವೇ

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

## Guru Raghavendra Stotra:

## Tamil:

ஸ்ரீபூர்ணபோத குருதீர்த பயோப்திபார
காமாரிமாக்ஷவிஷமாக்ஷஶிரஃஸ்ப்ருஶம்தீ |
பூர்வோத்தராமிததரம்கசரத்ஸுஹம்ஸா
தேவாலிஸேவித பராம்க்ரிபயோஜலக்னா || க ||

ஜீவேஶபேதகுணபூர்தி ஜகத்ஸு ஸத்வ
னீசோச்சபாவ முகனக்ரகணைஃ ஸமேதா |
துர்வாத்யஜாபதிகிலைர்குருராகவேம்த்ர
வாக்தேவதாஸரிதமும் விமலீகரொது || உ ||

ஶ்ரி ராகவேம்த்ரஃ ஸகலப்ரதாதா ஸ்வபாதகம்ஜத்வயபக்தி
மத்ப்யஃ |
அகாத்ரிஸம்பேதனத்றுஷ்டிவஜ்ரஃ க்ஷமாஸுரேம்த்ரோ&வது
மாம் ஸதா&யம் || ௩ ||

ஶ்ரி ராகவேம்த்ரோ ஹரிபாதகம்ஜனிஷேவணால்லப்த
ஸமஸ்தஸம்பத் |
தேவஸ்வபாவோ திவிஜத்ருமோ&யமிஷ்டப்ரதோ மே ஸததம் ஸ
பூயாத் || ச ||

பவ்யஸ்வரூபோ பவதுஃகதூலஸம்கக்னிசர்யஃ ஸுகதைர்யஶாலீ |
ஸமஸ்ததுஷ்டக்ரஹனிக்ரஹேஶொ |
துரத்யயோபப்லவஸிம்துஸேதுஃ || ரு ||

னிரஸ்ததோஷோ னிரவத்யவேஷஃ
ப்ரத்யர்திமூகத்வனிதானபாஷஃ |
வித்வத்பரிஜ்ஞேயமஹாவிஶேஷொ
வாக்வைகரீனிர்ஜிதபவ்யஶேஷஃ || கூ ||

ஸம்தானஸம்பத்பரிஶுத்தபக்தி
விஜ்ஞானவாக்தேஹஸுபாடவாதீன் தத்வா |
ஶரீரோத்த ஸமஸ்ததோஷான் ஹத்வா | ஸ
னோ&வ்யாத்குருராகவேம்த்ரஃ || எ ||

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

யத்பாதோதகஸம்சயஃ ஸூரனதீ முக்யாபகாஸாதிதா
ஸம்க்யானுத்தமபுண்யஸம்கவிலஸத்ப்ரக்யாதபுண்யாவஹஃ |
துஸ்தாபத்ரயனாஶனொ புவி மஹா வன்த்யாஸூபுத்ரப்ரதொ |
வ்யன்கஸ்வன்கஸம்ருத்திதொ க்ரஹமஹாபாபாபஹஸ்தம் ஶ்ரயெ
|| அ ||

யத்பாதகம்ஜரஜஸா பரிபூஷிதாம்காஃ
யத்பாதபத்ம மதுபாயிதமானஸா யே |
யத்பாதபத்மபரிகீர்தன ஜீர்ண வாச
ஸ்தத்தர்ஶனம் துரிதகானனதாவபூதம் || கூ ||

ஸர்வதம்த்ர ஸ்வதம்த்ரோ&ஸௌ ஸ்ரீமத்வமதவர்தனஃ |
விஜயீம்த்ரகராப்ஜோத்த ஸூதீம்த்ரவரபுத்ரகஃ || க0 ||

ஸ்ரீ ராகவேம்த்ரோ யதிராட் குருர்மெ ஸ்யாத்பயாபஹஃ |
ஜ்ஞான பக்தி ஸூபுத்ராயுர்யஶஹ ஶ்ரி புன்யவர்தனஹ || கக ||

ப்ரதிவாதிஜயஸ்வாம்தபேதசிஹ்னாதரோ குருஃ |
ஸர்வவித்யாப்ரவீணோ&ன்யோ ராகவேம்த்ரான்ன வித்யதெ || கஉ
||

அபரோக்ஷீக்றுதஸ்ரீஶஃ ஸமுபேக்ஷிதபாவஜஃ |
அபேக்ஷிதப்ரதாதான்யோ ராகவேம்த்ரான்ன வித்யதெ || கங ||

தயாதாக்ஷிண்யவைராக்ய வாக்பாடவமுகாம்கிதஃ |
ஶாபானுக்ரஹஶக்தோ&ன்யோ ராகவேம்த்ரான்ன வித்யதெ || கச
||

அஜ்ஞானவிஸ்ம்ரிதி ப்ராம்தி ஸம்ஶயாபஸ்ம்றுதிக்ஷயாஃ |
தம்த்ராகம்பவசஃகௌம்ட்யமுகா யே சேம்த்ரியோத்பவாஃ || கரு
||

தோஷாஸ்தெ னாஶமாயாம்தி ராகவேம்த்ரப்ரஸாததஃ |
ஓம் ஸ்ரீ ராகவேம்த்ராய னமஃ இத்யஷ்டாக்ஷரமம்த்ரதஃ |
ஜபிதாத்பாவிதானித்யம் இஷ்டார்தாஸ்ஸ்யுர்ன ஸம்ஶயஃ || கசூ ||

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

ஹம்து னஃ காயஜான் தோஷான் ஆத்மாத்மீயஸமுத்பவான் |
ஸர்வானபி புமர்தாம்ஶ்ச ததாது குருராத்மவித் || கஎ ||

இதி காலத்ரயே னித்யம் ப்ரார்தனாம் யஃ கரோதி ஸஃ |
இஹாமுத்ராப்தஸர்வேஷ்டோ மோததே னாத்ர ஸம்ஶயஃ || கअ ||

அகம்யமஹிமா லோகே ராகவேம்த்ரோ மஹாயஶாஃ |
ஶ்ரிமத்வமததுக்தாப்தி சம்த்ரோ&வது ஸதானகஃ || ககூ ||

ஸர்வயாத்ராபலாவாப்த்யை யதாஶக்திப்ரதக்ஷிணம் |
கரோமி தவ ஸித்தஸ்ய ப்றும்தாவனகதம் ஜலம் || உ0 ||

ஶிரஸா தாரயாம்யத்ய ஸர்வதீர்தபலாப்தயெ |
ஸர்வாபீஷ்டார்தஸித்த்யர்தம் னமஸ்காரம் கரோம்யஹம் || உக ||

தவ ஸம்கீர்தனம் வேதஶாஸ்த்ரார்தஜ்ஞானஸித்தயே |
ஸம்ஸாரெ அக்ஷயஸாகரெ ப்ரக்றுதிதோ&காதே ஸதா துஸ்தரே |
ஸர்வாவத்யஜலக்ரஹைரனுபமைஃ காமாதிபம்காகுலே |
னானா விப்ரமதுர்ப்ரமே&மிதபயஸ்தோமாதிபேனோத்கடே |
துஃகோத்க்றுஷ்டவிஷே ஸமுத்தர குரோ மாம் மக்னரூபம் ஸதா || உஉ ||

ராகவேம்த்ரகுருஸ்தோத்ரம் யஃபடேத்பக்திபூர்வகம் |
தஸ்ய குஷ்டாதிரோகானாம் னிவ்ருத்திஸ்த்வரயா பவெத் || உ௩ ||

அன்தொ.அபி திவ்யத்ரிஶ்திஹி ஸ்யாதெதமூகொபிவாக்பதிதி |
புர்னாயுஹு புர்னஸம்பத்திஹி ஸ்தொத்ரஸ்யாஸ்ய ஜபாத்பவெத் || உச ||

யஃ பிபேஜ்ஜலமேதேன ஸ்தோத்ரேணைவாபிமம்த்ரிதம் |
தஸ்ய குக்ஷிகதா தோஷாஃ ஸர்வே னஶ்யம்தி தத் க்ஷணாத் || உரு ||

யத்வ்றும்தாவனமாஸாத்ய பம்குஃ கம்ஜோ&பி வா ஜனஃ |
ஸ்தோத்ரேணானேன யஃ குர்யாத் ப்ரதக்ஷிணனமஸ்க்றுதீ || உகூ ||

WWW.GURURAGHAVENDRA.ORG Satsangha Stotra Collection

ஸ ஜம்காலோ பவேதேவ குருராஜப்ரஸாததஃ |
ஸோமஸூர்யோபராகே ச புஷ்யார்காதிஸமாகமே ‖ உஎ ‖

யோ&னுத்தமமிதம் ஸ்தோத்ரமஷ்டோத்தரஶதம் ஜபேத் |
பூதப்ரேதபிஶாசாதி பீடா தஸ்ய ன ஜாயதே ‖ உஅ ‖

ஏதத் ஸ்தோத்ரம் ஸமுச்சார்ய குரோர்வ்றும்தாவனாம்திகே |
தீபஸம்யோஜனாஜ்ஞானம் புத்ரலாபோ பவேத்த்ருவம் ‖ உகூ ‖

பரவாதிஜயோ திவ்யஜ்ஞானபக்த்யாதிவர்தனம் |
ஸர்வாபீஷ்டப்ரவ்றுத்திஃ ஸ்யாத் னாத்ர கார்யா விசாரணா ‖ ௩0
‖

ராஜசோரமஹாவ்யாக்ர ஸர்பனக்ராதிபீடனம் |
ன ஜாயதே&ஸ்ய ஸ்தோத்ரஸ்ய ப்ரபாவான்னாத்ர ஸம்ஶயஃ ‖
௩க ‖

யோ பக்த்யா குருராகவேம்த்ர சரணத்வம்த்வம் ஸ்மரன் யஃ
படேத் |
ஸ்தோத்ரம் திவ்யமிதம் ஸதா ன ஹி பவேத்த ஸ்யாஸுகம்
கிம்சன ‖

கிம்த்விஷ்டார்தஸம்றுத்திரேவ கமலானாதப்ரஸாதோதயாத் |
கீர்திர்திக்விதிதா விபூதிரதுலா ஸாக்ஷீ ஹயாஸ்யோ&த்ர ஹி ‖ ௩உ
‖

இதி ஶ்ரீராகவேம்த்ரார்யகுராஜப்ரஸாததஃ |
க்றுதம் ஸ்தோத்ரமிதம் புண்யம் ஶ்ரீமத்பிர்யப்பணாபிதைஃ ‖

பூஜ்யாய ராகவேம்த்ராய ஸத்யதர்மரதாய ச |
பஜதாம் கல்பவ்றுக்ஷாய னமதாம் காமதேனவே ‖

துர்வாதி த்வாம்தரவயே வைஷ்ணவேம்தீவரேம்தவே
ஶ்ரீராகவேம்த்ரகுரவே னமோத்யம்ததயாளவே

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

## Guru Raghavendra Stotra:

## TELUGU:

శ్రీపూర్ణబోధ గురుతీర్థ పయోబ్ధిపార
కామారిమాక్షవిషమాక్షశిరఃస్పృశంతీ ।
పూర్వోత్తరామితతరంగచరత్సుహంసా
దేవాలిసేవిత పరాంఘ్రిపయోజలగ్నా ॥ ౧ ॥

జీవేశభేదగుణపూర్తి జగత్సు సత్వ
నీచోచ్చభావ ముఖనక్రగణైః సమేతా ।
దుర్వాద్యజాపతిగిలైర్గురురాఘువేంద్ర
వాగ్దేవతాసరిదముం విమలీకరోతు ॥ ౨ ॥

శ్రీ రాఘువేంద్రః సకలప్రదాతా స్వపాదకంజద్వయభక్తి మద్భ్యః ।
అఘాద్రిసంభేదనదృష్టివజ్రః క్షమాసురేంద్రోఽవతు మాం సదాఽయం ॥ ౩ ॥

శ్రీ రాఘువేంద్రో హరిపాదకంజనిషేవణాల్లబ్ధ సమస్తసంపత్ ।
దేవస్వభావో దివిజద్రుమోఽయమిష్టప్రదో మే సతతం స భూయాత్ ॥ ౪ ॥

భవ్యస్వరూపో భవదుఃఖతూలసంఘుగ్నిచర్యః సుఖధైర్యశాలీ ।
సమస్తదుష్టగ్రహనిగ్రహేశో । దురత్యయోపప్లవసింధుసేతుః ॥ ౫ ॥

నిరస్తదోషో నిరవద్యవేషః ప్రత్యర్థిమూకత్వనిదానభాషః ।
విద్వత్పరిజ్ఞేయమహావిశేషా వాగ్వైఖరీనిర్జితభవ్యశేషః ॥ ౬ ॥

సంతానసంపత్పరిశుద్ధభక్తి విజ్ఞానవాగ్దేహసుపాటవాదీన్ దత్వా ।
శరీరోత్థ సమస్తదోషాన్ హత్వా । స నోఽవ్యాద్గురురాఘువేంద్రః ॥ ౭ ॥

యత్పాదోదకసంచయః సురనదీ ముఖ్యాపగాసాదితా
సంఖ్యానుత్తమపుణ్యసంఘవిలసత్ప్రఖ్యాతపుణ్యావహః ।
దుస్తాపత్రయనాశనో భువి మహా వన్ధ్యాసుపుత్రప్రదో ।

వ్యఙ్గస్వఙ్గసమృద్ధిదో గ్రహమహాపాపాపహస్తమ్ శ్రయె ॥ ౮ ॥

యత్పాదకంజరజసా పరిభూషితాంగాః
యత్పాదపద్మ మధుపాయితమానసా యే ।
యత్పాదపద్మపరికీర్తన జీర్ణ వాచ
స్తద్దర్శనం దురితకాననదావభూతం ॥ ౯ ॥

సర్వతంత్ర స్వతంత్రోఽసౌ శ్రీమధ్వమతవర్ధనః ।
విజయీంద్రకరాబ్జోత్థ సుధీంద్రవరపుత్రకః ॥ ౧౦ ॥

శ్రీ రాఘవేంద్రో యతిరాట్ గురుర్మె స్యాద్భయాపహః ।
జ్ఞాన భక్తి సుపుత్రాయుర్యశహ శ్రి పున్యవర్ధనహ ॥ ౧౧ ॥

ప్రతివాదిజయస్వాంతభేదచిహ్నాదరో గురుః ।
సర్వవిద్యాప్రవీణోఽన్యో రాఘవేంద్రాన్న విద్యతే ॥ ౧౨ ॥

అపరోక్షీకృతశ్రీశః సముపేక్షితభావజః ।
అపేక్షితప్రదాతాన్యో రాఘవేంద్రాన్న విద్యతె ॥ ౧౩ ॥

దయాదాక్షిణ్యవైరాగ్య వాక్పాటవముఖాంకితః ।
శాపానుగ్రహశక్తోఽన్యో రాఘవేంద్రాన్న విద్యతె ॥ ౧౪ ॥

అజ్ఞానవిస్మృతి భ్రాంతి సంశయాపస్మృతిక్షయాః ।
తంద్రాకంపవచఃకౌంఠ్యముఖా యే చేంద్రియోద్భవాః ॥ ౧౫ ॥

దోషాస్తె నాశమాయాంతి రాఘవేంద్రప్రసాదతః ।
ఓం శ్రీ రాఘవేంద్రాయ నమః ఇత్యష్టాక్షరమంత్రతః ।
జపితాద్భావితానిత్యమ్ ఇష్టార్థాస్స్యుర్న సంశయః ॥ ౧౬ ॥

హంతు నః కాయజాన్ దోషాన్ ఆత్మాత్మీయసముద్భవాన్ ।

WWW.GURURAGHAVENDRA.ORG Satsangha Stotra Collection

సర్వానపి పుమర్థాంశ్చ దదాతు గురురాత్మవిత్ ॥ ౧౭ ॥

ఇతి కాలత్రయే నిత్యం ప్రార్థనాం యః కరోతి సః ।
ఇహాముత్రాప్తసర్వేష్టో మోదతే నాత్ర సంశయః ॥ ౧౮ ॥

అగమ్యమహిమా లోకే రాఘవేంద్రో మహాయశాః ।
శ్రీమధ్వమతదుగ్ధాబ్ధి చంద్రోఽవతు సదానఘః ॥ ౧౯ ॥

సర్వయాత్రాఫలావాప్త్యై యథాశక్తిప్రదక్షిణం ।
కరోమి తవ సిద్ధస్య బృందావనగతం జలం ॥ ౨౦ ॥

శిరసా ధారయామ్యద్య సర్వతీర్థఫలాప్తయె ।
సర్వాభీష్టార్థసిద్ధ్యర్థం నమస్కారం కరోమ్యహం ॥ ౨౧ ॥

తవ సంకీర్తనం వేదశాస్త్రార్థజ్ఞానసిద్ధయే ।
సంసారె అక్షయసాగరె ప్రకృతితోఽగాధే సదా దుస్తరే ।
సర్వావద్యజలగ్రహైరనుపమైః కామాదిభంగాకులే ।
నానా విభ్రమదుర్భ్రమేఽమితభయస్తోమాదిఫేనోత్కటే ।
దుఃఖోత్కృష్టవిషే సముద్ధర గురో మాం మగ్నరూపం సదా ॥ ౨౨ ॥

రాఘవేంద్రగురుస్తోత్రం యఃపఠేద్భక్తిపూర్వకం ।
తస్య కుష్ఠాదిరోగానామ్ నివృత్తిస్తరయా భవెత్ ॥ ౨౩ ॥

అన్ధో.అపి దివ్యద్రుశ్తిహి స్యాదెదమూకొపివాక్పతిథి ।
పుర్నాయుహు పుర్నసమ్పత్తిహి స్తొత్రస్యాస్య జపాద్భవెత్ ॥ ౨౪ ॥

యః పిబేజ్జలమేతేన స్తోత్రేణైవాభిమంత్రితం ।
తస్య కుక్షిగతా దోషాః సర్వే నశ్యంతి తత్ క్షణాత్ ॥ ౨౫ ॥

యద్వృందావనమాసాద్య పంగుః ఖంజోఽపి వా జనః ।

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

స్తోత్రేణానేన యః కుర్యాత్ ప్రదక్షిణనమస్కృతీ ॥ ౨౬ ॥

స జంఘాలో భవేదేవ గురురాజప్రసాదతః ।
సోమసూర్యోపరాగే చ పుష్యార్కాదిసమాగమే ॥ ౨౭ ॥

యోఽనుత్తమమిదం స్తోత్రమష్టోత్తరశతం జపేత్ ।
భూతప్రేతపిశాచాది పీడా తస్య న జాయతే ॥ ౨౮ ॥

ఏతత్ స్తోత్రం సముచ్చార్య గురోర్వృందావనాంతికే ।
దీపసంయోజనాజ్ఞానం పుత్రలాభో భవేద్ధ్రువం ॥ ౨౯ ॥

పరవాదిజయో దివ్యజ్ఞానభక్త్యాదివర్ధనం ।
సర్వాభీష్టప్రవృద్ధిః స్యాత్ నాత్ర కార్యా విచారణా ॥ ౩౦ ॥

రాజచోరమహావ్యాఘ్ర సర్పనక్రాదిపీడనం ।
న జాయతేఽస్య స్తోత్రస్య ప్రభావాన్నాత్ర సంశయః ॥ ౩౧ ॥

యో భక్త్యా గురురాఘవేంద్ర చరణద్వంద్వం స్మరన్ యః పఠేత్ ।
స్తోత్రం దివ్యమిదం సదా న హి భవేత్తస్యాసుఖం కించన ॥

కింత్విష్టార్థసమృద్ధిరేవ కమలానాథప్రసాదోదయాత్ ।
కీర్తిర్దిగ్విదితా విభూతిరతులా సాక్షీ హయాస్యోఽత్ర హి ॥ ౩౨ ॥

ఇతి శ్రీరాఘవేంద్రార్యగురురాజప్రసాదతః ।
కృతం స్తోత్రమిదం పుణ్యం శ్రీమద్భిర్యప్పణాభిధైః ॥

పూజ్యాయ రాఘవేంద్రాయ సత్యధర్మరతాయ చ ।
భజతాం కల్పవృక్షాయ నమతాం కామధేనవే ॥
దుర్వాది ధ్వాంతరవయే వైష్ణవేందీవరేందవే
శ్రీరాఘవేంద్రగురవే నమోత్యంతదయాళవే

WWW GURURAGHAVENDRA.ORG Satsangha Stotra Collection

## Guru Raghavendra Stotra:

## Marathi:

श्रीपूर्णबोध गुरुतीर्थ पयोब्धिपार
कामारिमाक्षविषमाक्षशिरःस्पृशंती ।
पूर्वोत्तरामिततरंगचरत्सुहंसा
देवालिसेवित परांघ्रिपयोजलग्ना ॥ १ ॥

जीवेशभेदगुणपूर्ति जगत्सु सत्व
नीचोच्चभाव मुखनक्रगणैः समेता ।
दुर्वाद्यजापतिगिलैर्गुरुराघवेंद्र
वाग्देवतासरिदमुं विमलीकरोतु ॥ २ ॥

श्रि राघवेंद्रः सकलप्रदाता स्वपादकंजद्वयभक्ति मद्भ्यः ।
अघाद्रिसंभेदनदृष्टिवज्रः क्षमासुरेंद्रोऽवतु मां सदाऽयं ॥ ३ ॥

श्रि राघवेंद्रो हरिपादकंजनिषेवणाल्लब्ध समस्तसंपत ।
देवस्वभावो दिविजद्रुमोऽयमिष्टप्रदो मे सततं स भूयात ॥ ४ ॥

भव्यस्वरूपो भवदुःखतूलसंघग्निचर्यः सुखधैर्यशाली ।
समस्तदुष्टग्रहनिग्रहेशो । दुरत्ययोपप्लवसिंधुसेतुः ॥ ५ ॥

निरस्तदोषो निरवद्यवेषः प्रत्यर्थिमूकत्वनिदानभाषः ।
विद्वत्परिज्ञेयमहाविशेषो वाग्वैखरीनिर्जितभव्यशेषः ॥ ६ ॥

संतानसंपत्परिशुद्धभक्ति विज्ञानवाग्देहसुपाटवादीन दत्वा ।
शरीरोत्थ समस्तदोषान हत्वा । स नोऽव्याद्गुरुराघवेंद्रः ॥ ७ ॥

यत्पादोदकसंचयः सुरनदी मुख्यापगासादिता
संख्यानुत्तमपुण्यसंघविलसत्प्रख्यातपुण्यावहः ।
दुस्तापत्रयनाशनो भुवि महा वन्ध्यासुपुत्रप्रदो ।
व्यन्गस्वन्गसम्रुद्धिदो ग्रहमहापापापहस्तम श्रये ॥ ८ ॥

यत्पादकंजरजसा परिभूषितांगाः
यत्पादपद्म मधुपायितमानसा ये ।
यत्पादपद्मपरिकीर्तन जीर्ण वाच
स्तद्दर्शनं दुरितकाननदावभूतं ॥ ९ ॥

सर्वतंत्र स्वतंत्रोऽसौ श्रीमध्वमतवर्धनः ।
विजयींद्रकराब्जोत्थ सुधींद्रवरपुत्रकः ॥ १० ॥

श्री राघवेंद्रो यतिराट गुरुर्मे स्याद्भयापहः ।
ज़ान भक्ति सुपुत्रायुर्यशह श्रि पुन्यवर्धनह ॥ ११ ॥

प्रतिवादिजयस्वांतभेदचिह्नादरो गुरुः ।
सर्वविद्याप्रवीणोऽन्यो राघवेंद्रान्न विद्यते ॥ १२ ॥

अपरोक्षीकृतश्रीशः समुपेक्षितभावजः ।
अपेक्षितप्रदातान्यो राघवेंद्रान्न विद्यते ॥ १३ ॥

दयादाक्षिण्यवैराग्य वाक्पाटवमुखांकितः ।
शापानुग्रहशक्तोऽन्यो राघवेंद्रान्न विद्यते ॥ १४ ॥

अज़ानविस्म्रिति भ्रांति संशयापस्मृतिक्षयाः ।
तंद्राकंपवचःकौंध्यमुखा ये चेंद्रियोद्भवाः ॥ १५ ॥

WWW.GURURAGHAVENDRA.ORG Satsangha Stotra Collection

दोषास्ते नाशमायांति राघवेंद्रप्रसादतः ।
ओं श्री राघवेंद्राय नमः इत्यष्टाक्षरमंत्रतः ।
जपिताद्भावितानित्यम इष्टार्थास्स्युर्न संशयः ॥ १६ ॥

हंतु नः कायजान दोषान आत्मात्मीयसमुद्भवान ।
सर्वानपि पुमर्थांश्च ददातु गुरुरात्मवित ॥ १७ ॥

इति कालत्रये नित्यं प्रार्थनां यः करोति सः ।
इहामुत्राप्तसर्वेष्टो मोदते नात्र संशयः ॥ १८ ॥

अगम्यमहिमा लोके राघवेंद्रो महायशाः ।
श्रिमध्वमतदुग्धाब्धि चंद्रोऽवतु सदानघः ॥ १९ ॥

सर्वयात्राफलावाप्त्यै यथाशक्तिप्रदक्षिणं ।
करोमि तव सिद्धस्य बृंदावनगतं जलं ॥ २० ॥

शिरसा धारयाम्यद्य सर्वतीर्थफलाप्तये ।
सर्वाभीष्टार्थसिद्ध्यर्थं नमस्कारं करोम्यहं ॥ २१ ॥

तव संकीर्तनं वेदशास्त्रार्थज्ञानसिद्धये ।
संसारे अक्षयसागरे प्रकृतितोऽगाधे सदा दुस्तरे ।
सर्वाविद्यजलग्रहैरनुपमैः कामादिभंगाकुले ।
नाना विभ्रमदुर्भ्रमेऽमितभयस्तोमादिफेनोत्कटे ।
दुःखोत्कृष्टविषे समुद्धर गुरो मां मग्नरूपं सदा ॥ २२ ॥

राघवेंद्रगुरुस्तोत्रं यःपठेद्भक्तिपूर्वकं ।
तस्य कुष्ठादिरोगानाम निवृत्तिस्त्वरया भवेत ॥ २३ ॥

WWW.GURURAGHAVENDRA.ORG Satsangha Stotra Collection

अन्धो.अपि दिव्यद्रिश्तिहि स्यादेदमूकोपिवाक्पतिथि ।
पुर्नायुहु पुर्नसम्पत्तिहि स्तोत्रस्यास्य जपाद्भवेत ॥ २४ ॥

यः पिबेज्जलमेतेन स्तोत्रेणैवाभिमंत्रितं ।
तस्य कुक्षिगता दोषाः सर्वे नश्यंति तत क्षणात ॥ २५ ॥

यद्बृंदावनमासाद्य पंगुः खंजोऽपि वा जनः ।
स्तोत्रेणानेन यः कुर्यात प्रदक्षिणनमस्कृती ॥ २६ ॥

स जंघालो भवेदेव गुरुराजप्रसादतः ।
सोमसूर्योपरागे च पुष्यार्कादिसमागमे ॥ २७ ॥

योऽनुत्तममिदं स्तोत्रमष्टोत्तरशतं जपेत ।
भूतप्रेतपिशाचादि पीडा तस्य न जायते ॥ २८ ॥

ऐतत स्तोत्रं समुच्चार्य गुरोर्वृंदावनांतिके ।
दीपसंयोजनाज्ञानं पुत्रलाभो भवेद्ध्रुवं ॥ २९ ॥

परवादिजयो दिव्यज्ञानभक्त्यादिवर्धनं ।
सर्वाभीष्टप्रवृद्धिः स्यात नात्र कार्या विचारणा ॥ ३० ॥

राजचोरमहाव्याघ्र सर्पनक्रादिपीडनं ।
न जायतेऽस्य स्तोत्रस्य प्रभावान्नात्र संशयः ॥ ३१ ॥

यो भक्त्या गुरुराघवेंद्र चरणद्वंद्वं स्मरन यः पठेत ।
स्तोत्रं दिव्यमिदं सदा न हि भवेत्त स्यासुखं किंचन ॥

किंत्विष्टार्थसमृद्धिरेव कमलानाथप्रसादोदयात ।

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

कीर्तिर्दिग्विदिता विभूतिरतुला साक्षी हयास्योऽत्र हि ॥ ३२ ॥

इति श्रीराघवेंद्रार्यगुराजप्रसादतः ।
कृतं स्तोत्रमिदं पुण्यं श्रीमद्भिर्यप्पणाभिदैः ॥

पूज्याय राघवेंद्राय सत्यधर्मरताय च ।
भजतां कल्पवृक्षाय नमतां कामधेनवे ॥

दुर्वादि ध्वांतरवये वैष्णवेंदीवरेंदवे
श्रीराघवेंद्रगुरवे नमोत्यंतदयाळवे

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

## Guru Raghavendra Stotra:

## Malayalam:

ശ്രീപൂര്ണബോധ ഗുരുതീര്ഥ പയോബ്ധിപാര
കാമാരിമാക്ഷവിഷമാക്ഷശിരഃസ്പൃശംതീ ।
പൂര്വോത്തരാമിതതരംഗചരത്സുഹംസാ
ദേവാലിസേവിത പരാംഘ്രിപയോജലഗ്നാ ॥ ൧ ॥

ജീവേശഭേദഗുണപൂര്തി ജഗത്സു സത്വ
നീചോച്ചഭാവ മുഖനക്രഗണൈഃ സമേതാ ।
ദുര്വാദ്യജാപതിഗിലൈര്ഗുരുരാഘവേംദ്ര
വാഗ്ദേവതാസരിദമും വിമലീകരൊതു ॥ ൨ ॥

ശ്രീ രാഘവേംദ്രഃ സകലപ്രദാതാ സ്വപാദകംജദ്വയഭക്തി മദ്ഭ്യഃ ।
അഘാദ്രിസംഭേദനദൃഷ്ടിവജ്രഃ ക്ഷമാസുരേംദ്രോഽവതു മാം
സദാഽയം ॥ ൩ ॥

ശ്രീ രാഘവേംദ്രോ ഹരിപാദകംജനിഷേവണാല്ലബ്ധ സമസ്തസംപത് ।
ദേവസ്വഭാവോ ദിവിജദ്രുമോഽയമിഷ്ടപ്രദോ മേ സതതം സ ഭൂയാത് ॥
൪ ॥

ഭവ്യസ്വരൂപോ ഭവദുഃഖതൂലസംഘാഗ്നിചര്യഃ സുഖധൈര്യശാലീ ।
സമസ്തദുഷ്ടഗ്രഹനിഗ്രഹേശൊ । ദുരത്യയോപപ്ലവസിംധുസേതുഃ ॥
൫ ॥

നിരസ്തദോഷോ നിരവദ്യവേഷഃ പ്രത്യര്ഥിമൂകത്വനിദാനഭാഷഃ ।
വിദ്വത്പരിജ്ഞേയമഹാവിശേഷൊ വാഗ്വൈഖരീനിര്ജിതഭവ്യശേഷഃ
॥ ൬ ॥

സംതാനസംപത്പരിശുദ്ധഭക്തി
വിജ്ഞാനവാഗ്ദേഹസുപാടവാദീന് ദത്വാ ।
ശരീരോത്ഥ സമസ്തദോഷാന് ഹത്വാ । സ
നോഽവ്യാദ്ഗുരുരാഘവേംദ്രഃ ॥ ൭ ॥

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

യത്പാദോദകസംചയഃ സുരനദീ മുഖ്യാപഗാസാദിതാ
സംഖ്യാനുത്തമപുണ്യസംഘവിലസത്പ്രഖ്യാതപുണ്യാവഹഃ ।
ദുസ്താപത്രയനാശനൊ ഭുവി മഹാ വന്ധ്യാസുപുത്രപ്രദൊ ।
വ്യന്ഗസ്വന്ഗസമ്രുദ്ധിദൊ ഗ്രഹമഹാപാപാപഹസ്തമ് ശ്രയെ ॥ ൮ ॥

യത്പാദകംജരജസാ പരിഭൂഷിതാംഗാഃ
യത്പാദപദ്മ മധുപായിതമാനസാ യേ ।
യത്പാദപദ്മപരികീര്തന ജീര്ണ വാച
സ്തദ്ദര്ശനം ദുരിതകാനനദാവഭൂതം ॥ ൯ ॥

സര്വതംത്ര സ്വതംത്രോഽസൗ ശ്രീമധ്വമതവര്ധനഃ ।
വിജയീംദ്രകരാബ്ജോത്ഥ സുധീംദ്രവരപുത്രകഃ ॥ ൧൦ ॥

ശ്രീ രാഘവേംദ്രോ യതിരാട് ഗുരുര്മെ സ്യാദ്ഭയാപഹഃ ।
ജ്ഞാന ഭക്തി സുപുത്രായുര്യശഹ ശ്രി പുന്യവര്ധനഹ ॥ ൧൧ ॥

പ്രതിവാദിജയസ്വാംതഭേദചിഹ്നാദരോ ഗുരുഃ ।
സര്വവിദ്യാപ്രവീണോഽന്യോ രാഘവേംദ്രാന്ന വിദ്യതെ ॥ ൧൨ ॥

അപരോക്ഷീകൃതശ്രീശഃ സമുപേക്ഷിതഭാവജഃ ।
അപേക്ഷിതപ്രദാതാന്യോ രാഘവേംദ്രാന്ന വിദ്യതെ ॥ ൧൩ ॥

ദയാദാക്ഷിണ്യവൈരാഗ്യ വാക്പാടവമുഖാംകിതഃ ।
ശാപാനുഗ്രഹശക്തോഽന്യോ രാഘവേംദ്രാന്ന വിദ്യതെ ॥ ൧൪ ॥

അജ്ഞാനവിസ്മൃതി ഭ്രാംതി സംശയാപസ്മൃതിക്ഷയാഃ ।
തംദ്രാകംപവചഃകൌംഠ്യമുഖാ യേ ചേംദ്രിയോദ്ഭവാഃ ॥ ൧൫ ॥

ദോഷാസ്തെ നാശമായാംതി രാഘവേംദ്രപ്രസാദതഃ ।
ഓം ശ്രീ രാഘവേംദ്രായ നമഃ ഇത്യഷ്ടാക്ഷരമംത്രതഃ ।
ജപിതാദ്ഭാവിതാനിത്യമ് ഇഷ്ടാര്ഥാസ്സ്യുര്ന സംശയഃ ॥ ൧൬ ॥

ഹംതു നഃ കായജാന് ദോഷാന് ആത്മാത്മീയസമുദ്ഭവാന് ।
സര്വാനപി പുമര്ഥാംശ്ച ദദാതു ഗുരുരാത്മവിത് ॥ ൧൭ ॥

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

ഇതി കാലത്രയേ നിത്യം പ്രാര്ഥനാം യഃ കരോതി സഃ ।
ഇഹാമുത്രാപ്തസര്വേഷ്ടോ മോദതേ നാത്ര സംശയഃ ॥ ൧൮ ॥

അഗമ്യമഹിമാ ലോകേ രാഘവേംദ്രോ മഹായശാഃ ।
ശ്രിമധ്വമതദുഗ്ധാബ്ധി ചംദ്രോഽവതു സദാനഘഃ ॥ ൧൯ ॥

സര്വയാത്രാഫലാവാപ്ത്യൈ യഥാശക്തിപ്രദക്ഷിണം ।
കരോമി തവ സിദ്ധസ്യ ബൃംദാവനഗതം ജലം ॥ ൨൦ ॥

ശിരസാ ധാരയാമ്യദ്യ സര്വതീര്ഥഫലാപ്തയെ ।
സര്വാഭീഷ്ടാര്ഥസിദ്ധ്യര്ഥം നമസ്കാരം കരോമ്യഹം ॥ ൨൧ ॥

തവ സംകീര്ത്തനം വേദശാസ്ത്രാര്ഥജ്ഞാനസിദ്ധയേ ।
സംസാരെ അക്ഷയസാഗരെ പ്രകൃതിതോഽഗാധേ സദാ ദുസ്തരേ ।
സര്വാവദ്യജലഗ്രഹൈരനുപമൈഃ കാമാദിഭംഗാകുലേ ।
നാനാ വിഭ്രമദുര്ഭ്രമേഽമിതഭയസ്തോമാദിഫേനോത്കടേ ।
ദുഃഖോത്കൃഷ്ടവിഷേ സമുദ്ധര ഗുരോ മാം മഗ്നരൂപം സദാ ॥ ൨൨ ॥

രാഘവേംദ്രഗുരുസ്തോത്രം യഃപഠേദ്ഭക്തിപൂര്വകം ।
തസ്യ കുഷ്ഠാദിരോഗാനാമ് നിവ്രുത്തിസ്ത്വരയാ ഭവെത് ॥ ൨൩ ॥

അന്ധൊ.അപി ദിവ്യദ്രിശ്തിഹി സ്യാദെദമൂകൊപിവാക്പതിഥി ।
പുര്നായുഹു പുര്നസമ്പത്തിഹി സ്തൊത്രസ്യാസ്യ ജപാദ്ഭവെത് ॥
൨൪ ॥

യഃ പിബേജ്ജലമേതേന സ്തോത്രേണൈവാഭിമംത്രിതം ।
തസ്യ കുക്ഷിഗതാ ദോഷാഃ സര്വേ നശ്യംതി തത് ക്ഷണാത് ॥ ൨൫ ॥

യദ്വൃംദാവനമാസാദ്യ പംഗുഃ ഖംജോഽപി വാ ജനഃ ।
സ്തോത്രേണാനേന യഃ കുര്യാത് പ്രദക്ഷിണനമസ്കൃതീ ॥ ൨൬ ॥

സ ജംഘാലോ ഭവേദേവ ഗുരുരാജപ്രസാദതഃ ।
സോമസൂര്യോപരാഗേ ച പുഷ്യാര്കാദിസമാഗമേ ॥ ൨൭ ॥

യോഽനുത്തമമിദം സ്തോത്രമഷ്ടോത്തരശതം ജപേത് ।

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

ഭൂതപ്രേതപിശാചാദി പീഡാ തസ്യ ന ജായതേ ॥ ൧൮ ॥

ഏതത് സ്തോത്രം സമുച്ചാര്യ ഗുരോര്വൃംദാവനാംതികേ ।
ദീപസംയോജനാജ്ഞാനം പുത്രലാഭോ ഭവേദ്ധ്രുവം ॥ ൧൯ ॥

പരവാദിജയോ ദിവ്യജ്ഞാനഭക്ത്യാദിവര്ധനം ।
സര്വാഭീഷ്ടപ്രവൃദ്ധിഃ സ്യാത് നാത്ര കാര്യാ വിചാരണാ ॥ ൨൦ ॥

രാജചോരമഹാവ്യാഘ്ര സര്പനക്രാദിപീഡനം ।
ന ജായതേഽസ്യ സ്തോത്രസ്യ പ്രഭാവാന്നാത്ര സംശയഃ ॥ ൨൧ ॥

യോ ഭക്ത്യാ ഗുരുരാഘവേംദ്ര ചരണദ്വംദ്വം സ്മരന് യഃ പഠേത് ।
സ്തോത്രം ദിവ്യമിദം സദാ ന ഹി ഭവേത്ത സ്യാസുഖം കിംചന ॥

കിംത്വിഷ്ടാര്ഥസമൃദ്ധിരേവ കമലാനാഥപ്രസാദോദയാത് ।
കീര്തിര്ദിഗ്വിദിതാ വിഭൂതിരതുലാ സാക്ഷീ ഹയാസ്യോഽത്ര ഹി ॥
൨൨ ॥

ഇതി ശ്രീരാഘവേംദ്രാര്യഗുരുരാജപ്രസാദതഃ ।
കൃതം സ്തോത്രമിദം പുണ്യം ശ്രീമദ്ഭിര്യപ്പണാഭിധൈഃ ॥

പൂജ്യായ രാഘവേംദ്രായ സത്യധര്മരതായ ച ।
ഭജതാം കല്പവൃക്ഷായ നമതാം കാമധേനവേ ॥

ദുര്വാദി ധ്വാംതരവയേ വൈഷ്ണവേംദീവരേംദവേ
ശ്രീരാഘവേംദ്രഗുരവേ നമോത്യംതദയാളവേ

WWW.GURURAGHAVENDRA.ORG Satsangha Stotra Collection

## Guru Raghavendra Stotra:

## Gujarathi:

શ્રીપૂર્ણબોધ ગુરુતીર્થ પયોબ્ધિપાર
કામારિમાક્ષવિષમાક્ષશિરઃસ્પૃશંતી ।
પૂર્વોત્તરામિતતરંગચરત્સુહંસા
દેવાલિસેવિત પરાંઘ્રિપયોજલગ્ના ॥ ૧ ॥

જીવેશભેદગુણપૂર્તિ જગત્સુ સત્વ
નીચોચ્ચભાવ મુખનક્રગણૈઃ સમેતા ।
દુર્વાદ્યજાપતિગિલૈર્ગુરુરાઘવેંદ્ર
વાગ્દેવતાસરિદમું વિમલીકરોતુ ॥ ૨ ॥

શ્રિ રાઘવેંદ્રઃ સકલપ્રદાતા સ્વપાદકંજદ્વયભક્તિ મદ્ભ્યઃ ।
અઘાદ્રિસંભેદનદૃષ્ટિવજ્રઃ ક્ષમાસુરેંદ્રોટવતુ માં સદાટયં ॥ ૩ ॥

શ્રિ રાઘવેંદ્રો હરિપાદકંજનિષેવણાલ્લબ્ધ સમસ્તસંપત ।
દેવસ્વભાવો દિવિજદ્રુમોટયમિષ્ટપ્રદો મે સતતં સ ભૂયાત ॥ ૪ ॥

ભવ્યસ્વરૂપો ભવદુઃખતૂલસંઘગ્નિચર્યઃ સુખધૈર્યશાલી ।
સમસ્તદુષ્ટગ્રહનિગ્રહેશો । દુરત્યયોપપ્લવસિંધુસેતુઃ ॥ ૫ ॥

નિરસ્તદોષો નિરવદ્યવેષઃ પ્રત્યર્થિમૂકત્વનિદાનભાષઃ ।
વિદ્વત્પરિજ્ઞેયમહાવિશેષો વાગ્વૈખરીનિર્જિતભવ્યશેષઃ ॥ ૬ ॥

સંતાનસંપત્પરિશુદ્ધભક્તિ વિજ્ઞાનવાગ્દેહસુપાટવાદીન દત્વા ।
શરીરોત્થ સમસ્તદોષાન હત્વા । સ નોટવ્યાદ્ગુરુરાઘવેંદ્રઃ ॥ ૭ ॥

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

યત્પાદોદકસંચયઃ સુરનદી મુખ્યાપગાસાદિતા
સંખ્યાનુત્તમપુણ્યસંઘવિલસત્પ્રખ્યાતપુણ્યાવહઃ ।
દુસ્તાપત્રયનાશનો ભુવિ મહા વન્ધ્યાસુપુત્રપ્રદો ।
વ્યન્ગસ્વન્ગસમ્રુદ્ધિદો ગ્રહમહાપાપાપહસ્તમ શ્રયે ॥ ૮ ॥

યત્પાદકંજરજસા પરિભૂષિતાંગાઃ
યત્પાદપદ્મ મધુપાયિતમાનસા યે ।
યત્પાદપદ્મપરિકીર્તન જીર્ણ વાચ
સ્તદ્દર્શનં દુરિતકાનનદાવભૂતં ॥ ૯ ॥

સર્વતંત્ર સ્વતંત્રોટસૌ શ્રીમધ્વમતવર્ધનઃ ।
વિજયીંદ્રકરાબ્જોત્થ સુધીંદ્રવરપુત્રકઃ ॥ ૧૦ ॥

શ્રી રાઘવેંદ્રો યતિરાટ ગુરુર્મે સ્યાદ્ભયાપહઃ ।
જ્ઞાન ભક્તિ સુપુત્રાયુર્યશહ શ્રિ પુન્યવર્ધનહ ॥ ૧૧ ॥

પ્રતિવાદિજયસ્વાંતભેદચિહ્નાદરો ગુરુઃ ।
સર્વવિદ્યાપ્રવીણોટન્યો રાઘવેંદ્રાન્ન વિદ્યતે ॥ ૧૨ ॥

અપરોક્ષીકૃતશ્રીશઃ સમુપેક્ષિતભાવજઃ ।
અપેક્ષિતપ્રદાતાન્યો રાઘવેંદ્રાન્ન વિદ્યતે ॥ ૧૩ ॥

દયાદાક્ષિણ્યવૈરાગ્ય વાક્પાટવમુખાંકિતઃ ।
શાપાનુગ્રહશક્તોટન્યો રાઘવેંદ્રાન્ન વિદ્યતે ॥ ૧૪ ॥

અજ્ઞાનવિસ્મ્રિતિ ભ્રાંતિ સંશયાપસ્મૃતિક્ષયાઃ ।
તંદ્રાકંપવચઃકૌંઠ્યમુખા યે ચેંદ્રિયોદ્ભવાઃ ॥ ૧૫ ॥

WWW.GURURAGHAVENDRA.ORG Satsangha Stotra Collection

દોષાસ્તે નાશમાયાંતિ રાઘવેંદ્રપ્રસાદતઃ ।
ઓં શ્રી રાઘવેંદ્રાય નમઃ ઈત્યષ્ટાક્ષરમંત્રતઃ ।
જપિતાદ્ભાવિતાનિત્યમ ઈષ્ટાર્થાસ્સ્યુર્ન સંશયઃ ॥ ૧૬ ॥

હંતુ નઃ કાયજાન દોષાન આત્માત્મીયસમુદ્ભવાન ।
સર્વાનપિ પુમર્થાશ્ચ દદાતુ ગુરુરાત્મવિત ॥ ૧૭ ॥

ઈતિ કાલત્રયે નિત્યં પ્રાર્થનાં યઃ કરોતિ સઃ ।
ઈહામુત્રાપ્તસર્વેષ્ટો મોદતે નાત્ર સંશયઃ ॥ ૧૮ ॥

અગમ્યમહિમા લોકે રાઘવેંદ્રો મહાયશાઃ ।
શ્રિમધ્વમતદુગ્ધાબ્ધિ ચંદ્રોટવતુ સદાનઘઃ ॥ ૧૯ ॥

સર્વયાત્રાફલાવાપ્ત્યૈ યથાશક્તિપ્રદક્ષિણં ।
કરોમિ તવ સિદ્ધસ્ય બૃંદાવનગતં જલં ॥ ૨૦ ॥

શિરસા ધારયામ્યદ્ય સર્વતીર્થફલાપ્તયે ।
સર્વાભીષ્ટાર્થસિદ્ધ્યર્થં નમસ્કારં કરોમ્યહં ॥ ૨૧ ॥

તવ સંકીર્તનં વેદશાસ્ત્રાર્થજ્ઞાનસિદ્ધયે ।
સંસારે અક્ષયસાગરે પ્રકૃતિતોટગાધે સદા દુસ્તરે ।
સર્વાવદ્યજલગ્રહૈરનુપમૈઃ કામાદિભંગાકુલે ।
નાના વિભ્રમદુર્ભ્રમેટમિતભયસ્તોમાદિફેનોત્કટે ।
દુઃખોત્કૃષ્ટવિષે સમુદ્ધર ગુરો માં મગ્નરૂપં સદા ॥ ૨૨ ॥

રાઘવેંદ્રગુરુસ્તોત્રં યઃપઠેદ્ભક્તિપૂર્વકં ।

WWW.GURURAGHAVENDRA.ORG Satsangha Stotra Collection

તસ્ય કુષ્ઠાદિરોગાનામ નિવ્રુત્તિસ્તરચા ભવેત ॥ ૨૩ ॥

અન્ધો.અપિ દિવ્યદ્રિશ્તિહિ સ્યાદેદમૂકોપિવાકપતિથિ ।
પુર્નાયુહુ પુર્નસમ્પત્તિહિ સ્તોત્રસ્યાસ્ય જપાદ્ભવેત ॥ ૨૪ ॥

યઃ પિબેજ્જલમેતેન સ્તોત્રેણૈવાભિમંત્રિતં ।
તસ્ય કુક્ષિગતા દોષાઃ સર્વે નશ્યંતિ તત ક્ષણાત ॥ ૨૫ ॥

યદ્વૃંદાવનમાસાદ્ય પંગુઃ ખંજોટપિ વા જનઃ ।
સ્તોત્રેણાનેન યઃ કુર્યાત પ્રદક્ષિણનમસ્કૃતી ॥ ૨૬ ॥

સ જંઘાલો ભવેદેવ ગુરુરાજપ્રસાદતઃ ।
સોમસૂર્યોપરાગે ચ પુષ્યાર્કાદિસમાગમે ॥ ૨૭ ॥

યોટનુત્તમમિદં સ્તોત્રમષ્ટોત્તરશતં જપેત ।
ભૂતપ્રેતપિશાચાદિ પીડા તસ્ય ન જાયતે ॥ ૨૮ ॥

એતત સ્તોત્રં સમુચ્ચાર્ય ગુરોર્વૃંદાવનાંતિકે ।
દીપસંયોજનાજ્ઞાનં પુત્રલાભો ભવેદ્ધ્રુવં ॥ ૨૯ ॥

પરવાદિજયો દિવ્યજ્ઞાનભક્ત્યાદિવર્ધનં ।
સર્વાભીષ્ટપ્રવૃદ્ધિઃ સ્યાત નાત્ર કાર્યા વિચારણા ॥ ૩૦ ॥

રાજચોરમહાવ્યાઘ્ર સર્પનક્રાદિપીડનં ।
ન જાયતેટસ્ય સ્તોત્રસ્ય પ્રભાવાન્નાત્ર સંશયઃ ॥ ૩૧ ॥

યો ભક્ત્યા ગુરુરાઘવેંદ્ર ચરણદ્વંદ્વં સ્મરન યઃ પઠેત ।

સ્તોત્રં દિવ્યમિદં સદા ન હિ ભવેત્ત સ્યાસુખં કિંચન ॥

કિંત્વિષ્ટાર્થસમૃદ્ધિરેવ કમલાનાથપ્રસાદોદયાત ।
કીર્તિર્દિગ્વિદિતા વિભૂતિરતુલા સાક્ષી હયાસ્યોટત્ર હિ ॥ ૩૨ ॥

ઈતિ શ્રીરાઘવેંદ્રાર્યગુરાજપ્રસાદતઃ ।
કૃતં સ્તોત્રમિદં પુણ્યં શ્રીમદ્ભિર્યપ્પણાભિદૈઃ ॥

પૂજ્યાય રાઘવેંદ્રાય સત્યધર્મરતાય ચ ।
ભજતાં કલ્પવૃક્ષાય નમતાં કામધેનવે ॥

દુર્વાદિ ધ્વાંતરવયે વૈષ્ણવેંદીવરેંદવે
શ્રીરાઘવેંદ્રગુરવે નમોત્યંતદયાળવે

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

## Guru Raghavendra Stotra:

## BENGALI:

শ্রীপূর্ণবোধ গুরুতীর্থ পয়োব্ধিপার
কামারিমাক্ষবিষমাক্ষশিরঃস্পৃশংতী ।
পূর্বোত্তরামিততরংগচরৎসুহংসা
দেবালিসেবিত পরাংঘ্রিপয়োজলগ্না ॥ ১ ॥

জীবেশভেদগুণপূর্তি জগৎসু সত্ব
নীচোচ্চভাব মুখনক্রগণৈঃ সমেতা ।
দুর্বাদ্যজাপতিগিলৈর্গুরুরাঘবেংদ্র
বাগ্দেবতাসরিদমুং বিমলীকরোতু ॥ ২ ॥

শ্রি রাঘবেংদ্রঃ সকলপ্রদাতা স্বপাদকংজদ্বয়ভক্তি মদভ্যঃ ।
অঘাদ্রিসংভেদনদৃষ্টিবজ্রঃ ক্ষমাসুরেংদ্রোঽবতু মাং সদাঽয়ং ॥ ৩ ॥

শ্রি রাঘবেংদ্রো হরিপাদকংজনিষেবণাল্লব্ধ সমস্তসংপত ।
দেবস্বভাবো দিবিজদ্রুমোঽয়মিষ্টপ্রদো মে সততং স ভূয়াত ॥ ৪ ॥

ভব্যস্বরূপো ভবদুঃখতূলসংঘগ্নিচর্যঃ সুখধৈর্যশালী ।
সমস্তদুষ্টগ্রহনিগ্রহেশো । দুরত্যয়োপপ্লবসিংধুসেতুঃ ॥ ৫ ॥

নিরস্তদোষো নিরবদ্যবেষঃ প্রত্যর্থিমূকত্বনিদানভাষঃ ।
বিদ্বৎপরিজ্ঞেয়মহাবিশেষো বাগ্বৈখরীনির্জিতভব্যশেষঃ ॥ ৬ ॥

সংতানসংপৎপরিশুদ্ধভক্তি বিজ্ঞানবাগ্দেহসুপাটবাদীন দত্বা ।

WWW.GURURAGHAVENDRA.ORG Satsangha Stotra Collection

শরীরোত্থ সমস্তদোষান হত্বা । স নোঽব্যাদ্গুরুরাঘবেংদ্রঃ ॥ ৭ ॥

য়ৎপাদোদকসংচয়ঃ সুরনদী মুখ্যাপগাসাদিতা
সংখ্যানুত্তমপুণ্যসংঘবিলসৎপ্রখ্যাতপুণ্যাবহঃ ।
দুস্তাপত্রয়নাশনো ভুবি মহা বন্ধ্যাসুপুত্রপ্রদো ।
ব্যন্গস্বন্গসমৃদ্ধিদো গ্রহমহাপাপাপহস্তম শ্রয়ে ॥ ৮ ॥

য়ৎপাদকংজরজসা পরিভূষিতাংগাঃ
য়ৎপাদপদ্ম মধুপায়িতমানসা য়ে ।
য়ৎপাদপদ্মপরিকীর্তন জীর্ণ বাচ
স্তদ্দর্শনং দুরিতকাননদাবভূতং ॥ ৯ ॥

সর্বতংত্র স্বতংত্রোঽসৌ শ্রীমধ্বমতবর্ধনঃ ।
বিজয়ীংদ্রকরাব্জোত্থ সুধীংদ্রবরপুত্রকঃ ॥ ১০ ॥

শ্রী রাঘবেংদ্রো য়তিরাট গুরুর্মে স্যাদভয়াপহঃ ।
জ্ঞান ভক্তি সুপুত্রায়ুর্য়শহ শ্রি পুন্যবর্ধনহ ॥ ১১ ॥

প্রতিবাদিজয়স্বাংতভেদচিহ্নাদরো গুরুঃ ।
সর্ববিদ্যাপ্রবীণোঽন্যো রাঘবেংদ্রান্ন বিদ্যতে ॥ ১২ ॥

অপরোক্ষীকৃতশ্রীশঃ সমুপেক্ষিতভাবজঃ ।
অপেক্ষিতপ্রদাতান্যো রাঘবেংদ্রান্ন বিদ্যতে ॥ ১৩ ॥

দয়াদাক্ষিণ্যবৈরাগ্য বাকপাটবমুখাংকিতঃ ।
শাপানুগ্রহশক্তোঽন্যো রাঘবেংদ্রান্ন বিদ্যতে ॥ ১৪ ॥

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

অজ্ঞানবিস্মিৃতি ভ্রাংতি সংশয়াপস্মৃতিক্ষয়াঃ ।
তংদ্রাকংপবচঃকৌংঠ্যমুখা য়ে চেংদ্রিয়োদভবাঃ ॥ ১৫ ॥

দোষাস্তে নাশমায়াংতি রাঘবেংদ্রপ্রসাদতঃ ।
ওং শ্রী রাঘবেংদ্রায় নমঃ ইত্যষ্টাক্ষরমংত্রতঃ ।
জপিতাদভাবিতানিত্যম ইষ্টার্থাস্স্যুর্ন সংশয়ঃ ॥ ১৬ ॥

হংতু নঃ কায়জান দোষান আত্মাত্মীয়সমুদভবান ।
সর্বানপি পুমর্থাংশ্চ দদাতু গুরুরাত্মবিত ॥ ১৭ ॥

ইতি কালত্রয়ে নিত্যং প্রার্থনাং য়ঃ করোতি সঃ ।
ইহামুত্রাপ্তসর্বেষ্টো মোদতে নাত্র সংশয়ঃ ॥ ১৮ ॥

অগম্যমহিমা লোকে রাঘবেংদ্রো মহায়শাঃ ।
শ্রিমধ্বমতদুগ্ধাব্ধি চংদ্রোঽবতু সদানঘঃ ॥ ১৯ ॥

সর্বয়াত্রাফলাবাপ্ত্যৈ য়থাশক্তিপ্রদক্ষিণং ।
করোমি তব সিদ্ধস্য বৃংদাবনগতং জলং ॥ ২০ ॥

শিরসা ধারয়াম্যদ্য সর্বতীর্থফলাপ্তয়ে ।
সর্বাভীষ্টার্থসিদ্ধ্যর্থং নমস্কারং করোম্যহং ॥ ২১ ॥

তব সংকীর্তনং বেদশাস্ত্রার্থজ্ঞানসিদ্ধয়ে ।
সংসারে অক্ষয়সাগরে প্রকৃতিতোঽগাধে সদা দুস্তরে ।
সর্বাবদ্যজলগ্রহৈরনুপমৈঃ কামাদিভংগাকুলে ।

WWW.GURURAGHAVENDRA.ORG Satsangha Stotra Collection

নানা বিভ্রমদুর্ভ্রমেঽমিতভয়স্তোমাদিফেনোৎকটে ।
দুঃখোৎকৃষ্টবিষে সমুদ্ধর গুরো মাং মগ্নরূপং সদা ॥ ২২ ॥

রাঘবেংদ্রগুরুস্তোত্রং য়ঃপঠেদ্ভক্তিপূর্বকং ।
তস্য কুষ্ঠাদিরোগানাম নিরুত্তিস্ত্বরয়া ভবেত ॥ ২৩ ॥

অন্ধো.অপি দিব্যদ্রিশ্তিহি স্যাদেদমূকোপিবাক্পতিথি ।
পুর্নায়ুহু পুর্নসম্পত্তিহি স্তোত্রস্যাস্য জপাদ্ভবেত ॥ ২৪ ॥

য়ঃ পিবেত্জলমেতেন স্তোত্রেণৈবাভিমংত্রিতং ।
তস্য কুক্ষিগতা দোষাঃ সর্বে নশ্যংতি তত ক্ষণাত ॥ ২৫ ॥

য়দবৃংদাবনমাসাদ্য পংগুঃ খংজোঽপি বা জনঃ ।
স্তোত্রেণানেন য়ঃ কুর্য়াত প্রদক্ষিণনমস্কৃতী ॥ ২৬ ॥

স জংঘালো ভবেদেব গুরুরাজপ্রসাদতঃ ।
সোমসূর্য়োপরাগে চ পুষ্যার্কাদিসমাগমে ॥ ২৭ ॥

য়োঽনুত্তমমিদং স্তোত্রমষ্টোত্তরশতং জপেত ।
ভৃতপ্রেতপিশাচাদি পীডা তস্য ন জায়তে ॥ ২৮ ॥

এতত স্তোত্রং সমুচ্চার্য় গুরোর্বৃংদাবনাংতিকে ।
দীপসংয়োজনাজ্ঞানং পুত্রলাভো ভবেদ্ধ্রুবং ॥ ২৯ ॥

পরবাদিজয়ো দিব্যজ্ঞানভক্ত্যাদিবর্ধনং ।
সর্বাভীষ্টপ্রবৃদ্ধিঃ স্যাত নাত্র কার্য়া বিচারণা ॥ ৩০ ॥

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection

রাজচোরমহাব্যাঘ্র সর্পনক্রাদিপীডনং ।
ন জায়তেঽস্য স্তোত্রস্য প্রভাবান্নাত্র সংশয়ঃ ॥ ৩১ ॥

য়ো ভক্ত্যা গুরুরাঘবেংদ্র চরণদ্বংদ্বং স্মরন য়ঃ পঠেত ।
স্তোত্রং দিব্যমিদং সদা ন হি ভবেত্ত স্যাসুখং কিংচন ॥

কিংত্বিষ্টার্থসমৃদ্ধিরেব কমলানাথপ্রসাদোদয়াত ।
কীর্তির্দিগ্বিদিতা বিভূতিরতুলা সাক্ষী হয়াস্যোঽত্র হি ॥ ৩২ ॥

ইতি শ্রীরাঘবেংদ্রার্যগুরাজপ্রসাদতঃ ।
কৃতং স্তোত্রমিদং পুণ্যং শ্রীমদ্ভির্য়প্পণাভিদৈঃ ॥

পূজ্যায় রাঘবেংদ্রায় সত্যধর্মরতায় চ ।
ভজতাং কল্পবৃক্ষায় নমতাং কামধেনবে ॥

দুর্বাদি ধ্বাংতরবয়ে বৈষ্ণবেংদীবরেংদবে
শ্রীরাঘবেংদ্রগুরবে নমোত্যংতদয়ালবে

WWW.GURURAGHAVENDRA.ORG
Satsangha Stotra Collection